# अथुच्प्रत्ययः एकमवलोकनम् ।

## 1. वेपथुः ।

*(डा. वि. आर्. मनोज्, व्याख्याता, श्री चन्द्रशेखरेन्द्रसरस्वतीविश्वमहाविद्यालयः, काञ्ची)*

रावणाज्ञया मायामयो मृगो भूत्वा मारीचः सीतायाः मनः प्रलोभयामास। सा रामलक्ष्मणावयाचयत् – "आर्यपुत्राभिरामोऽसौ मृगो हरति मे मनः ।

आनयैनं महाबाहो क्रीडार्थं नो भविष्यति । ।" इति । (**43.10.**आरण्यकाण्डम् ।)

इत्थमुल्लसितस्पृहां वैदेहीं वीक्ष्य रामो मृगमानयितुं प्रातिष्ठत। स च मारीचः क्रीडाव्याजेन किञ्चित्तिष्ठन्, रामेऽभ्यागते ततोऽभ्यद्रुवन्, किञ्चिदात्मानं दर्शयन्, तत आत्मानं निगूहयन् यथा वै – "छिन्नाभ्रैरिव संवीतं शारदं चन्द्रमण्डलम् ।

मुहूर्तादिव ददृशे मुहुर्दूरात्प्रकाशते । ।" इति । (**44.7.**आरण्यकाण्डम् ।)

इत्थं स मारीचः दर्शनादर्शनेनैव राममाश्रमस्य दूरमपाकर्षत्। रामस्तु तेन मृगेण मोहितः तथा परिश्रान्तश्च नितरां क्रुद्धः सन् तमेवमृगमुद्दिश्य ज्वलितं ब्रह्मविनिर्मितमस्त्रं मुमोच। स चाशनिसन्निभो रामबाणः मारीचस्य हृदयं बिभेद। तदा म्रियमाणो मारीचः रावणवचः स्मृत्वा राघवस्येव सदृशं 'हा सीते, हा लक्ष्मण.......' इति स्वनं चकार। भर्तुः सदृशमार्तस्वरं निशम्य सीतया प्रचोदितो लक्ष्मणो रामान्तिकं द्रुतमद्रुवत्। एतस्मिन्नन्तरे रावणः परिव्राजकरूपेण आश्रमं प्राविशत्। प्रलोभनेन सीतां वशमानयितुं प्रायतत। एतेन संक्रुद्धा विदेहनन्दिनी रावणम् अभर्त्सयत। तदा– "अभिगम्य सुदुष्टात्मा राक्षसः काममोहितः ।

जग्राह रावणः सीतां बुधः खे रोहिणीमिव । ।" इति । (**49.16.**आरण्यकाण्डम् ।)

एवं रावणः सीतां बलादाश्रमादपहृत्य लङ्कां प्रत्यपद्यत। किन्तु मार्गे जटायुना सह रावणस्य घोरसम्प्रहारो बभूव। ततः स कृच्छ्रेण जटायुमहनत्। सीतया पौनः पुन्येन रावणो भर्त्सितः। "तदा भृशार्थां बहु चैव भाषिणीं विलापपूर्वं करुणञ्च भामिनीम् ।
जहार पापस्तरुणीं विचेष्टतीं नृपात्मजामागतगात्रवेपथुः । ।" इति । (**53.26.**आरण्यकाण्डम् ।)

महानयमविवेक आचरितो रावणेन योऽस्य नाशहेतुरभूत्। तदस्तु– नृपात्मजामागतगात्रवेपथुः इत्युपरिष्टादुक्तम्। कोऽर्थः ? कोपवशात्कम्पमानशरीरो रावणः सीतां जहारेत्यर्थः। तर्हि कुरुक्षेत्रयुद्धभूमौ पूर्वाहितसमस्तरोषस्य–

"सीदन्ति मम गात्राणि मुखञ्च परिशुष्यति। वेपथुश्च शरीरे मे रोमहर्षश्च जायते।।" इति वदतोऽर्जुनस्य किं रोषेण वेपथुरागतः इति चेन्न। तत्र ह्युक्तं– "कृपया परयाऽविष्टो विषीदन्निदमब्रवीत्" इति। अर्थान्नखलु कोपाकुलस्य भयाविष्टस्य वा अर्जुनस्य वेपथुरभूत्। प्रत्युत पूर्वाहितसमस्तरोषस्याप्यर्जुनस्य कारुण्याकुलस्य बन्धुमित्रादीनां वधचिन्तया तप्तहृदयस्य शोकार्तस्य दुःखाद्वेपथुरभूत्।

तदास्तां तावत्। किमुक्तं पूर्वं ? रावणस्याविवेकः तस्य नाशायाभूदिति ! आम् 'अविवेकः परमापदां पदमि'त्याह महाकविर्भारविः। अतः 'सहसा विदधीत न क्रियाम्' इति। अविवेकतः खलु साहसम्। अये ! किं ब्रूहि महाकविराह साहसं न विदधीत इति ? कथङ्कारमयं तर्हि कविकुलचूडामणिः माघोऽकार्षीत् साहसम् ? यद् ऋतुवर्णनाप्रसङ्गे साहसमाचष्टे। कथमिव ? श्रूयताम् –

"प्रियतमेन यया सरुषा स्थितं न सह सा सहसा परिरभ्य तम्।
श्लथयितुं क्षणमक्षमताङ्गना न सहसा सहसा कृतवेपथुः।।" इति। (6.57.शिशुपालवधम्।)

साहसं खल्वेतत् ! न खलु किञ्चित्साहसमत्र। कवनकामिनीकामुकस्य काव्यलीलैषा खलु कवेः। विवृणुमस्तावत्– अत्र सहसाशब्दः चतुः कृत्वः प्रयुक्तः।

1) आद्ये 'सहसा' इत्यत्र सह + सा इति च्छेदः।
2) द्वितीय 'सहसा' शब्दस्य मार्गशीर्षमासोऽर्थः। तथा हि 'मार्गशीर्षे सहा मार्ग' इत्यमरः। हेमन्तऋतुवर्णनं खल्वेतत्।
3) तृतीय 'सहसा' शब्दस्य हसेन सह = सहास्या इत्यर्थः। तथा हि 'अथो हसः हासो हास्यञ्चे'त्यमरः।
4) चतुर्थ 'सहसा' शब्दस्य शीघ्रम् इत्यर्थः।

तथा हि सरोषया यया प्रियतमेन सह न स्थितं , सा अङ्गना सहसा (मार्गशीर्षमासेन) कृतवेपथुः (सती) तं प्रियं सहसा (सहास्या) (सती) सहसा (शीघ्रं) परिरभ्याऽऽश्लिष्य क्षणमपि श्लथयितुं नाऽक्षमतेत्यर्थः। अत्र हेमन्तकालिकशैत्यजन्यः गात्रवेपथुः। किमियं नायिका कोपाविष्टा उताहो कारुण्याकुला। नेतरत्। शैत्यादित्युक्तम्।

एवं सायङ्कालचन्द्रोदयादिवर्णनप्रसङ्गेऽपि माघनायिका वेपथुमती बभूव ह ! क्व ?

श्रूयताम्– "अवधार्य कार्यगुरुतामभवन्न भयाय सान्द्रतमसंतमसम्।
सुतनोः स्तनौ च दयितोपगमे तनुरोमराजिपथवेपथवे।।" इति। (**9.22.**शिशुपालवधम्।)

सान्द्रतमसंतमसं सुतनोः दयितोपगमे कार्यगुरुतामवधार्य भयाय नाऽभवत्। स्तनौ च तनुरोमराजिपथवेपथवे नाऽभवताम्। कार्यासक्तस्य तत्रापि कामुकस्य कुतो भयं क्लेशगणना चेति भावः। अत्र संतमसेऽपि कामाभिनिवेशातिरेकात् स्तनयोः वेपथुः नाभूदित्यर्थः। अयि भोः उपरिष्टात् 'हेमन्तकालिकशैत्यजन्यः गात्रवेपथुरित्यवादीत्। इह चेदानीं भयजनितगात्रवेपथोरनुदय उच्यते ! कथमेतत् ? श्रूयताम् वेपथुर्नाम कम्पः। न केवलं शैत्यभयादिभिः कम्प उदेति। किं तर्हि ? शृङ्गारेणापि । यथा _

"अनुदेहमागतवतः प्रतिमां परिणायकस्य गुरुमुद्वहता।
मुकुरेण वेपथुभृतोऽतिभरात्कथमप्यपाति न वधूकरतः।।" इति। (**9.73.**शिशुपालवधम्।)

इति माघपद्यं कमपिनायिकां वर्णयति। अनुदेहमागतवतः परिणायकस्य गुरुं प्रतिमामुद्वहता मुकुरेण वेपथुभृतोऽतिभरात् वधूकरतः कथमपि नाऽपाति। दर्पणे आत्मानं पश्यन्त्याः पृष्टत आगतस्य प्रियस्य प्रतिबिम्बं दर्पणे दृष्ट्वा भयशृङ्गाराभ्यां वेपथुमती = कम्पमाना नवोढा कथञ्चिन्महता प्रयत्नेन कराभ्यां दर्पणं धारितवतीत्यर्थः। अकस्मात्प्रियागमनेन नवोढायाः भयशृङ्गाराभ्यां वेपथुरभूदित्यर्थः।

न खलु केवलं माघस्य नायिकायाः वेपथुः। कालिदासोऽपि कमपि वेपथुमन्तं नायकं प्रस्तौति। रघुवंशेऽग्निवर्णशृङ्गारवर्णनप्रसङ्गे। कोऽयमग्निवर्णः ? श्रूयताम् _

रघुवंशस्याद्याध्यायनवके दिलीप रघु अज दशरथानां वर्णनं प्रस्तुतम्। ततः षट्स्वध्यायेषु रघुकुलतिलकं रामं वर्णयामास कविः। षोडशे सप्तदशे च कुशतत्सुतयोः (अथितेः) वर्णनम्। अष्टादशे प्रायः विंशत्यधिकाः राजानः प्रस्तुताः। किमेतत्कवेः दौर्जन्यम् ! न खलु दौर्जन्यम्। उदारचरितानां पुण्यश्लोकानां महिम्नो रघुवंशीयानां राज्ञां इयत्ता इयतीति वक्तुं कः क्षमः ! अतः कविः सर्वं संक्षेपयामासेति वक्तुं साम्प्रतम्। तदास्ताम्। अन्तिमेऽध्यायेऽग्निवर्णं वर्णयामास सविस्तरम् , येन रघुवंशः कालयवनिकायां निलीनः, यस्य गर्भिणी महाराणी अभिषिक्ता , तस्य अग्निवर्णस्य श्रृङ्गारवर्णनप्रसङ्गे_

"क्लृप्तपुष्पशयनॉल्लतागृहानेत्य दूतिकृतमार्गदर्शनः।

अन्वभूत्परिजनाङ्गनारतं सोऽवरोधभयवेपथूत्तरम्।।" इति। (**19.23.**रघुवंशम्।)

सोऽग्निवर्णः दूतीकृतमार्गदर्शनः क्लृप्तपुष्पशयनॉल्लतागृहानेत्य अवरोधभयवेपथूत्तरं परिजनाङ्गनारतम् अन्वभूत्। अर्थादन्तःपुरजनाद् भयेन यो वेपथुस्तेन सहितः (कम्पमान एव) दासीरतम् अन्वभूदित्यर्थः। तदास्ताम् कुमारसम्भवेऽपि रतिविलापप्रसङ्गे_

"शिरसा प्रणिपत्य याचितान्युपगूढानि सवेपथूनि च।

सुरतानि च तानि ते रहः स्मर संस्मृत्य न शान्तिरस्ति मे।।" इति। (**4.17.**कुमारसम्भवम्।)

यन्मम चरणयोः शिरसा प्रणिपत्य प्रेमाभ्यर्थनामकरोः , यद्वेपथुमतीं मामालिङ्ग्यैकान्ते रेमिषे, तत् स्मरन्त्या मे न शान्तिरस्तीति भावः। अत्र रत्या सात्विकभावोदय उपवर्णितः। यतः स्तम्भ प्रलय रोमाञ्च स्वेद वैवर्ण्य वैस्वर्य अश्रु वेपथु इत्यष्टौ सात्विकभावोदयलक्षणानि भवन्ति। अतोऽत्र सात्विकभावोदयलक्षणो वेपथुः, न तु हिंसाजन्यभिया सः। अत्र प्रियसमागमे नायिकायां ये वैवर्ण्यरोमाञ्चादयो भावविशेषा उदयन्ति ते सात्विकभावोदया उच्यन्ते । वेपथुः = कम्पः , सोऽप्यन्यतमो भावः। यथा वै पार्वत्याः शिवोपलब्धये तपश्चरन्त्याः सात्विकभावोदयचित्रणं कविकुलगुरुणा कालिदासेनाकलितम्। किमाकलितमिति ? किमुत ! सहृदयहृदयफलके काव्यसुन्दरीरूपालेखनं खलु कवेः कर्म येन सहृदया सद्यः परनिर्वृता भवेयुः। कालिदासस्येदं पद्यं कस्य वा सहृदयस्य हृदयं न जहार !

“तं वीक्ष्य वेपथुमती सरसाङ्गयष्टिर्निक्षेपणाय पदमुद्धृतमुद्वहन्ती।

मार्गाचलव्यतिकराकुलितेव सिन्धुः शैलाधिराजतनया न ययौ न तस्थौ।।” इति। (5.85.कुमारसम्भवम्।) तं महादेवं वीक्ष्य वेपथुमती खिन्नगात्री , अन्यत्र विन्यासायोत्क्षिप्तं पदमुद्वहन्ती पार्वती प्रवहणमार्गे स्थितस्य पर्वतस्यावरोधेन सम्भ्रमिता नदीव न ययौ न तस्थौ , गन्तुं स्थातुं वा न शशाकेत्यर्थः। लज्जयेति भावः। तथा च वेपथुमतीत्वमत्र महादेवदर्शनेन देव्याः सात्विकभावोदयसूचकम्।

भारवेः किरातार्जुनीयेऽपीयमेव नायिका, यस्याः वेपथुमत्याः एवङ्कारमेव सात्विकभावोदयो वर्णितः।

यथा - “अस्मिन्नगृह्यत पिनाकभृता सलीलमाबद्धवेपथुरधीरविलोचनायाः।

विन्यस्तमङ्गलमहौषधिरीश्वरायाः स्रस्तोरगप्रतिसरेण करेण पाणिः।।” इति। (5.33.किरातार्जुनीयम्।) तपश्चर्यार्थं प्रस्थितायाऽऽर्जुनाय गुह्यककृतहिमाद्रिवर्णनप्रसङ्गोऽयम्। अस्मिन्नद्रौ शिवेन (उरगदर्शनेन) चकितदृष्ट्याः गौर्याः आबद्धवेपथुः, विन्यस्तमङ्गलमहौषधिः, पाणिः गलितपन्नगप्रतिसरेण करेण सलीलमगृह्यतेति पार्वतीपरिणयवर्णनम्। अत्र आबद्धवेपथुः पार्वत्याः पाणिः इति देव्याः सात्विकभावोदयो लक्षितः।

एवं गन्धर्वाणामप्सरसाञ्च पुष्पावचयसलिलक्रीडावर्णनादिप्रसङ्गेऽपि भारविः वेपथुमतीः नायिकाः उपवर्णयामास। यथा -

“निरञ्जने साचिविलोकितं दृशावयावकं वेपथुरोष्ठपल्लवम्।

नतभ्रुवो मण्डयति स्म विग्रहे बलिक्रिया चातिलकं तदास्पदम्।।” इति। (8.52.किरातार्जुनीयम्।)

अत्र निरलङ्कारस्याङ्गनाशरीरस्य तच्छरीरविकारैरेवालङ्कारः समजनीत्यर्थः। तथा हि निर्धौतकज्जले विलोचने तिर्यगीक्षणं मण्डयति स्म। क्षालितलाक्षारागमेव अयावकं, तादृशमोष्ठपल्लवं वेपथुः मण्डयति स्म। तिलकरहितं ललाटं बलिक्रियारेखाबन्धश्च मण्डयति स्मेत्यर्थः। अये ! किमर्थं स्त्रीणामेवं लज्जाशीलः ? लज्जा खलु स्त्रीणां भूषणम्। यथोक्तं माघे_- “अन्यदा भूषणं पुंसां क्षमा लज्जेव योषितः” इति। (2.44.शिशुपालवधम्।)

नैतत्स्त्रीसाधारणम्। कुलयोषितामेव। अत एव “सलज्जा गणिका नष्टा निर्ल्लज्जाश्च कुलाङ्गनाः” इत्याप्तोक्तिः। तदास्तां। प्रियसमीपे निमज्जतीनां लोलचक्षुषां तासां वेपथुमतीनामप्सरस्त्रीणां मदनोदयो वर्ण्यते भारविणा_

“निमीलदाकेकरलोलचक्षुषां प्रियोपकण्ठं कृतगात्रवेपथुः।

निमज्जतीनां श्वसितोद्धितस्तनः श्रमो नु तासां मदनो नु पप्रथे।।” इति। (**8.53.**किरातार्जुनीयम्।)

अत्रापि प्रियसन्निधानरूपकारणाद्गात्रवेपथुः। एवं त्रिशिरादिराक्षसनिधनवर्णनाप्रसङ्गे भट्टिः_ “केचिद्वेपथुमासेदुरन्ये.......” इति। (**4.43.**भट्टिकाव्यम्।) इतीत्थं भयाज्जायमानस्य वेपथोः वर्ण नमकारीत्।

बहु प्रपञ्चितम्। शृण्वतो मे देहमासकलं वेपथुराविर्भवतीव। कुतस्तथा ? अपि भवानपि ममातिप्रसङ्गात् रावणवत्क्रोधाविष्टः ? मम अवाक्पटुत्वेनाऽऽर्जुनवत्कारुण्याकुलः ? उत काव्यनायिकानां सरसश्रृङ्गारलीलावतीनां गात्रवेपथुवर्णनासिन्धौ विगाहमानं मामवेक्ष्य लज्जावान् ? नहि नहि। न खलु तावत् ! कथमयं श्ब्दो निष्पद्यत इति जिज्ञासे।

‘टुवेपृ कम्पने’ (भ्वा.**367**) इति धातुः। धातौ वर्तमानानाम् इत्सँज्ञकवर्णानाम् (अनुबन्धानाम्) ट् , उ , ऋ इत्येतेषां लोपो भवति। ततो ‘वेप्’ इति धातुस्वरूपम्। अस्मिन् धातौ ‘टु’ इति वर्णसमुदायोऽपि इत्सँज्ञकवर्णः (अनुबन्धः) इत्यस्माभिः दृष्टम्। अतोऽयं धातु ट्विद् भवति। ‘टु’ इत् (अनुबन्धः) यस्मिन् धातौ सः ट्वित् इत्यर्थः। यो यो धातुष्ट्वित् तस्माद्धातोः ‘अथुच्’ इति कश्चित् प्रत्ययो भवति भावेऽर्थे "ट्वितोऽथुच्" (पा.सू.**3.3.89**) इति सूत्रेण। भावो नाम धातोरर्थः। कथमेतत् ! धात्वर्थरहितस्थलेऽपि धातोः प्रवृत्तिरिति वदति ? नहि तथा। एकैकोऽपि धातुः बह्वर्थकः। तत्र उपसर्गयोगेन धातुगताः विविधाः अर्थाः प्रकाशन्ते पृथक्। यथा ‘लप्’ धातोः प्रलाप आलाप संलाप विलाप अनुलाप विप्रलापादयो भिन्नार्थकाः शब्दाः विभिन्नोपसर्गैः व्यक्ताः। उपसर्गाभावे धातुपाठे योऽर्थ उक्तः स एव प्रकाशेत। यथा वै प्रकृते ‘टुवेपृ कम्पने’ इति धातुपाठनिर्देशात् गम्यते यत् ‘ट् उ (वेप्) ऋ’ धातोः कम्पनेऽर्थे प्रयोगः सामान्य इति। तथा चात्र ‘अथुच्’ प्रत्ययः कम्पनेऽर्थे प्रयुज्यते।

'वेपथुः' इति सिद्धरूपस्य (शब्दस्य) कम्पमात्रोऽर्थः। 'अथ वेपथुः कम्प' इत्यमरः। क्रोध भय शैत्य लज्जादिभिः, रोगाद्दौर्बल्याद्वा गात्रे 'वेपथुः' सम्भवति। **(1.वेपथुः।)**